# Shri SubrahmanyastotramalamantraH

# શ્રીસુબ્રહ્મણ્યસ્તોત્રમાલામન્ત્રઃ

## Document Information

Text title : shrii subrahmaNyastotramaalaamantraH

File name : subramAlAmantra.itx

Category : mAlAmantra, subrahmanya, mantra

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : March 15, 2006, Novemver 6, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

Shri SubrahmanyastotramalamantraH

# શ્રીસુબ્રહ્મણ્યસ્તોત્રમાલામન્ત્રઃ

ૐ અસ્ય શ્રીસુબ્રહ્મણ્યમાલામહામન્ત્રસ્ય, બ્રહ્મા ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીસુબ્રહ્મણ્યઃ કુમારો દેવતા ।
શ્રીં બીજં, હ્રીં શક્તિઃ, ક્લિં કીલકં,
મમ સર્વાભીષ્ટ સિદ્ધ્યર્થે જપે વિનિયોગઃ ।
કરન્યાસઃ - ૐ શ્રીં ક્લીં કુમારાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ શરવણભવાય તર્જનીભ્યાં નમઃ । ૐ કાર્તિકેયાય મધ્યમભ્યાં નમઃ ।
ૐ મયૂરવાહનાય અનામિકાભ્યાં નમઃ । ૐ સ્કન્દાય કનિષ્ઠિકાભ્યાં
નમઃ । ૐ સુબ્રહ્મણ્યાય કરતલકરપૃષ્ઠાભ્યાં નમઃ । એવં
હૃદયાદ્યઙ્ગન્યાસઃ । ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ । ધ્યાનમ્-
બાલાર્કાયુતસન્નિભં શિખિરથારૂઢં ચ ષડ્ભિર્મુખૈઃ ।
ભાસ્વદ્દ્વાશલોચનં મણિમયૈરાકલ્પકૈરાવૃતમ્ ।
વિદ્યાપુસ્તકશક્તિ કુક્કુટ ધનુર્બાણાસિખેટાન્વિતં
ભ્રાજત્કાર્મુકપઙ્કજં હૃદિ મહાસેનાન્યામાદ્યં ભજે ॥

અથ લમિત્યાદિ પઞ્ચપૂજા ।
લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ॥

ૐ શ્રીં હ્રીં ક્લીં નમો ભગવતે
ૐ હ્રીં સાં રુદ્રકુમારાય અષ્ટાઙ્ગયોગનાયકાય
મહામણિભિરલંકૃતાય ક્રૌઞ્ચગિરિવિદારણાય
તારકસંહારકારણાય
શક્તિશૂલગદાખડ્ગખેટપાશાઙ્કુશમુસલપ્રાસાદ્યનેક

ચિત્રાયુધાલંકૃતાય દ્વાદશભુજાય હારનૂપુરકેયૂરકનક
કુણ્ડલભૂષિતાય  સકલદેવસેનાસમૂહ પરિવૃતાય ગાઙ્ગેયાય
શરવણભવાય દેવલોકશરણ્યાય સર્વરોગાન્ હન હન દુષ્ટાન્
ત્રાસય ત્રાસય, ગણપતિસહોદરાય
ભૂતપ્રેતપિશાચકર્ષણાય, ગઙ્ગાસહાયાય
ૐકારસ્વરૂપાય વિષ્ણુશક્તિસ્વરૂપાય રુદ્રબીજસ્વરૂપિણે
વિશ્વરૂપાય મહાશાન્તાયતે નમઃ । ટીં મોહિન્યૈ નમઃ । હ્રીં
આકર્ષણ્યૈ નમઃ । હ્રીં સ્તમ્ભિન્યૈ નમઃ ।
શત્રૂનાકર્ષયાકર્ષય બન્ધય બન્ધય
સન્તાડય સન્તાડય વાતપિત્તશ્લેષ્મજ્વરામયાદી નાશુ
નિવારય નિવારય સકલવિષં ભીષય ભીષય સર્વોપદ્રવ
મુત્સારયોત્સારય માં રક્ષ રક્ષ ભગવન્ કાર્તિકેય પ્રસીદ
પ્રસીદ ।

ૐ નમો ભગવતે  સુબ્રહ્મણ્યાય મહાબલપરાક્રમાય
ક્રૌઞ્ચગિરિમર્દનાય અનેકાસુરપ્રાણાપહારાય
ઇન્દ્રાણીમાઙ્ગલ્યરક્ષકાય ત્રયસ્ત્રિંશત્કોટિદેવતાનન્દકરાય
દુષ્ટનિગ્રહાય શિષ્ટપરિપાલકાય વીરમહાબલ
હનુમન્નારસિંહ વરાહાદિસહિતાય
ઇન્દ્રાગ્નિયમનૈર્ઋતવરુણવાયુકુબેરેશાનદિગાકાશપાતાળબન્ધનાય
સર્વચણ્ડગ્રહાદિ નવકોટિગુરુનાથાય નવકોટિદાનવશાકિની
ડાકિની કામિની મોહિની સ્તમ્ભિની ગણ્ડભૈરવી
દુષ્ટભૈરવાદિસહિતભૂતપ્રેતપિશાચભેતાળબ્રહ્મરાક્ષસદુષ્ટગ્રહાન્
બન્ધય બન્ધય ષણ્મુખાય વજ્રધરાય સર્વગ્રહનિગ્રહાય
સર્વગ્રહં નાશય નાશય સર્વજ્વરં નાશય નાશય
સર્વરોગં નાશય નાશય સર્વદુરિતં નાશય નાશય ।
ૐ રં હ્રાં હ્રીં મયૂરવાહનાય હું ફટ્ સ્વાહા । ૐ સૈં હ્રીં ક્લીં ઐં સૈં
નં કં સૈં શરવણભવ ।
(જપાન્તે અઙ્ગન્યાસ દિગ્વિમોકધ્યાન પઞ્ચપૂજાઃ સમર્પણં ચ ।)
(કુમારતન્ત્રતઃ)
ૐ સું સુબ્રહ્મણ્યાય સ્વાહા । ૐ કાર્તિકેય પાર્વતીનન્દન સ્કન્દ વરદ
વરદ સર્વજનં મે વશમાનય સ્વાહા । ૐ સૌં સૂં સુબ્રહ્મણ્યાય

શક્તિહસ્તાય ઋગ્યજુઃ સામાથર્વણાય અસુરકુલમર્દનાય યોગાય
યોગાધિપતયે શાન્તાય શાન્તરૂપિણે શિવાય શિવનન્દનાય
ષષ્ઠીપ્રિયાય સર્વજ્ઞાનહૃદયાય ષણ્મુખાય શ્રીં શ્રીમ્
હ્રીં ક્ષં ગુહ રવિકઙ્કાલાય કાલરૂપિણે સુરરાજાય સુબ્રહ્મણ્યાય
નમઃ । ૐ નમો ભગવતે મહાપુરુષાય મયૂરવાહનાય ગૌરીપુત્રાય
ઈશાત્મજાય સ્કન્દસ્વામિને કુમારાય તારકારયે ષણ્મુખાય દ્વાદશનેત્રાય
દ્વાદશભુજાય દ્વાદશાત્મકાય શક્તિહસ્તાય સુબ્રહ્મણ્યાય ૐ નમઃ
સ્વાહા । ૐ હ્રીં સાં શરવણભવાય હ્રીં ફટ્ સ્વાહા ॥

॥ ઇતિ શ્રીસુબ્રહ્મણ્યસ્તોત્રમાલામન્ત્રઃ સમાપ્તઃ ॥

Encoded and proofread by antaratma at Safe-mail.net

*Shri SubrahmanyastotramalamantraH*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*